## अभ्यासप्रश्नपत्रम् (बहुविकल्पात्मकम्) - 2021-22
## कक्षा - दशमी
## संस्कृतम् (कोड-122)

**समयः – सार्धैक-होरा** **सम्पूर्णाङ्काः – 40**

---

**सामान्यनिर्देशाः -**

☞ अस्मिन् प्रश्नपत्रे खण्डद्वयम् अस्ति – 'क' तथा 'ख'
☞ अस्मिन् प्रश्नपत्रे दशविधप्रमुखप्रश्नाः सन्ति।
☞ अत्र 51 प्रश्नाः सन्ति तेषु निर्देशानुसारं केवलं 40 प्रश्नाः समाधेयाः।
☞ सर्वे प्रश्नाः बहुविकल्पात्मकाः सन्ति।
☞ सर्वेषां प्रश्नानां कृते एकः (1) अंकः निर्धारितः अस्ति।
☞ प्रश्नानां विकल्पेषु एकम् उचितं विकल्पं चिनुत।
☞ प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।
☞ उचितम् उत्तरं OMR पत्रके प्रदत्ते गोले नीललेखन्या/कृष्णलेखन्या सम्यक्तया रञ्जयत।

| | अनुप्रयुक्त-व्याकरणम् | |
|---|---|---|
| I. | **अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा चिनुत-** **(केवलं प्रश्नचतुष्टयम्)**<br>1. दुर्दान्तैर्दशनैरमुना **स्यान्नैव** जनग्रसनम्।<br>(क) स्यात् + नैव (ख) स्याच् + नैव<br>(ग) स्यात् + न्नैव (घ) स्या + नैव<br>2. एकनान्तारे कान्तारे क्षणमपि मे स्यात् **सञ्चरणम्**?<br>(क) सम् + चरणम् (ख) स + चरणम्<br>(ग) सत् + चरणम् (घ) सन् + चरणम्<br>3. **युष्मद्दर्शनात्** कुशलमिव।<br>(क) युष्मद्द + र्शनात् (ख) युष्म् + अदर्शनात्<br>(ग) युष्मद + दर्शनात् (घ) युष्मत् + दर्शनात्<br>4. **आर्योऽपि** गुरुचरणवन्दनायाम्।<br>(क) आर्यो + आपि (ख) आर्यः + अपि<br>(ग) आर्या + पि (घ) आर्य + अपि<br>5. एकः बलीवर्दः जवेन गन्तुम् **अशक्तश्चासीत्**।<br>(क) अशक्तश्चा + सीत् (ख) अशक्तश् + आसीत्<br>(ग) अशक्तः + चासीत् (घ) अशक् + तश्चासीत् | 1x4=4 |
| II. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत-** | 1x4=4 |

| | | |
|---|---|---|
| | **(केवलं प्रश्नचतुष्टयम्)**<br><br>6. महानगरमध्ये चलदनिशं **कालायसचक्रम्।**<br><br>(क) कालायसम् चक्रम् (ख) कालायसस्य चक्रम्<br>(ग) कालायसेषु चक्रम् (घ) कालायसाय चक्रम्<br><br>7. कुत्सितवस्तुमिश्रितं **समलं** धरातलम्।<br><br>(क) मलेन सहितम् (ख) मलस्य सहितम्<br>(ग) मलं सहितम् (घ) मलाय सहितम्<br>8. क्षत्रियकुलपितामहयोः **सूर्यचन्द्रयोः** को वा भवतोर्वंशस्य कर्ता?<br>(क) सूर्यः च चन्द्रः च (ख) सूर्यः च चन्द्रः च तस्य<br>(ग) सूर्यस्य च चन्द्रस्य च (घ) सूर्यः च चन्द्रः च तयोः<br><br>9. सुरभेरिमामवस्थां दृष्ट्वा **सुराधिपः** अपृच्छत्।<br><br>(क) सुरा च अधिपश्च (ख) सुरायै अधिपः<br><br>(ग) सुराणाम् अधिपः (घ) सुराम् अधिपः<br>10. कृषकः हर्षातिरेकेण **कर्षणविमुखः** सन् वृषभौ नीत्वा गृहमगात्।<br>(क) कर्षणात् विमुखः (ख) कर्षणेन विमुखः<br>(ग) कर्षणाय विमुखः (घ) कर्षणस्य विमुखः | |
| **III.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>11. हरिततरूणां ललितलतानां माला **रमणीया**।<br>(क) रमणीय + आ (ख) रम् + अणीया<br>(ग) रमणीय + टाप् (घ) रमणी + या<br>12. **बुद्धिमान्** बालकः सर्वत्र प्रशस्यते।<br>(क) बुद्धि + मान् (ख) बुद्धिम् + आन्<br>(ग) बुद्धि + मतुप् (घ) बुद्धि + वतुप्<br>13. **विद्वत्त्वं** च नृपत्वं च नैव तुल्यं कदाचन।<br>(क) विद्वस् + त्व (ख) विद्वस् + त्वत्<br>(ग) विद्वत् + त्व (घ) विद्वत् + त्वत्<br>14. संस्कृतस्य **महत् + त्व** को न जानाति? | 1x4=4 |

| | | |
|---|---|---|
| | (क) महत्ता (ख) महत्वम्<br>(ग) महत्त्वम् (घ) महतां<br>15. मनीषा **उत्तमा** गायिका अस्ति।<br>(क) उत्तम + आप् (ख) उत्तम + चाप्<br>(ग) उत्तम + टाप् (घ) उत्तम + डाप् | |
| **IV.** | **वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। (केवलं प्रश्नत्रयम्)**<br>16. छात्रेण -----------------पठ्यते।<br>(क) पाठम् (ख) पाठाः (ग) पाठान् (घ) पाठः<br>17. ----------- पाषाणि त्रोटयन्ति।<br>(क) श्रमिका (ख) श्रमिकाः (ग) श्रमिकेन (घ) श्रमिकैः<br>18. लतया कथा -----------।<br>(क) श्रूयन्ते (ख) श्रूयते (ग) शृणोति (घ) शृण्वन्ति<br>19. ---------भोजनं पचति।<br>(क) मात्रा (ख) पितरौ (ग) माता (घ) भगिन्यः | 1x3=3 |
| **V.** | **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नचतुष्टयम्)**<br>20. अहम् प्रातः ---------- (06:00) उत्तिष्ठामि।<br>(क) सार्ध-षड्वादने (ख) षड्वादने<br>(ग) सप्तवादने (घ) अष्टवादने<br>21. राजधानीरेलयानम् दिल्लीतः ---------- (5:45) वादने प्रस्थानम् करोति।<br>(क) सार्ध-पञ्चवादने (ख) सपाद-पञ्चवादने<br>(ग) पादोन-षड्वादने (घ) पादोन-पञ्चवादने<br>22. पुष्पाञ्जली ------------ (6:30) पूजां करोति।<br>(क) सार्ध-षड्वादने (ख) सपाद-षड्वादने<br>(ग) पादोन-षड्वादने (घ) षड्वादने<br>23. माधवः क्रीडितुं सायं ----------- (4:15) क्रीडाक्षेत्रं गच्छति।<br>(क) चतुर्वादने (ख) सार्ध-चतुर्वादने<br>(ग) पादोन-चतुर्वादने (घ) सपाद-चतुर्वादने<br>24. विद्यालये पुरस्कारवितरणं -------- (12:45) भविष्यति।<br>(क) सार्ध-द्वादशवादने (ख) सपाद-एकवादने<br>(ग) पादोन-एकवादने (घ) पादोन-द्वादशवादने | 1x4=4 |
| **VI.** | **वाक्यानुगुणम् उचिताव्ययपदं चिनुत - (केवलं प्रश्नत्रयम्)**<br>25. अयमेकः ………………… विभज्य भुज्यताम्।<br>(क) तद्य (ख) कुत्र (ग) तथा (घ) तावत् | 1x3=3 |

| | | |
|---|---|---|
| | 26. एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं ………… चलिता।<br>(क) निकषा (ख) पुरतः (ग) समीपम् (घ) प्रति<br>27. यदि एवं ………… मां निजगले बद्ध्वा चल सत्वरम्।<br>(क) तदा (ख) कदा (ग) तर्हि (घ) सदा<br>28. …………….. रविवासरः आसीत्।<br>(क) ह्यः (ख) अद्य (ग) सम्प्रति (घ) अधुना | |
| **VII.** | **अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चिनुत- (केवलं प्रश्नत्रयम्)**<br>29. ते लेखं **लिखसि**।<br>(क) लिखति (ख) लिखन्ति (ग) लिखतः (घ) लिखथ<br>30. वयं संस्कृतम् **पठामि**।<br>(क) पठावः (ख) पठामः (ग) पठामि (घ) फले<br>31. **एकः** छात्रा श्लोकं वदति।<br>(क) एक (ख) एका (ग) एकम् (घ) एकाः<br>32. **खगानि** आकाशे उड्डीयन्ते।<br>(क) खगाः (ख) खगः (ग) खगेषु (घ) खगानाम् | 1x3-3 |
| | **पठितावबोधनम्** | |
| **VIII.** | **रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत- (केवलं प्रश्नपञ्चकम्)**<br>33. **वाष्पयानमाला** संधावती वितरन्ती ध्वानम्।<br>(क) कः (ख) का (ग) किम् (घ) कम्<br>34. मार्गे **गहनकानने** सा एकं व्याघ्रं ददर्श।<br>(क) कस्मिन् (ख) कस्याम् (घ) कदा (ग) कथम्<br>35. बुद्धिमती **व्याघ्रजाद्** भयात् पुनरपि मुक्ताऽभवत्।<br>(क) का (ख) कुत्र (ग) कस्मात् (घ) कस्याः<br>36. अहमत्रभवतोः **जनकं** नामतो वेदितुमिच्छामि।<br>(क) कथम् (ख) किम् (ग) कस्य (घ) कम्<br>37. उपाध्यातदूतः **अस्मान्** त्वरयति।<br>(क) कस्मान् (ख) कान् (ग) कः (घ) कम्<br>38. **भवान्** कुतः भयात् पलायितः?<br>(क) कदा (ख) कान् (ग) कः (घ) किम् | 1x5-5 |
| **IX.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत- (केवलं प्रश्नचतुष्टयम्)** | 1x4=4 |

| | | |
|---|---|---|
| | 39. व्याघ्रोऽपि **<u>सहसा</u>** नष्टः गलबद्धश्रृगालकः।<br>(क) सह (ख) समीपम् (ग) अकस्मात् (घ) सदैव<br>40. मनः शोषयत् **<u>तनुः</u>** पेषयद् भ्रमति सदा वक्रम्।<br>(क) दुर्बलः (ख) मनः (ग) कृशः (घ) शरीरम्<br>41. तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः **<u>जवेन</u>** गन्तुमशक्तश्चासीत्।<br>(क) मनसा (ख) ताडनेन (ग) तेन (घ) वेगेन<br>42. भगवन् **<u>सहस्रदीधितिः</u>**।<br>(क) श्रीरामः (ख) लक्ष्मी (ग) सूर्यः (घ) कुबेरः<br>43. कज्जलमलिनं धूमं **<u>मुञ्चति</u>** शतशकटीयानम्।<br>(क) कुञ्चति (ख) त्यजति (ग) भ्रमति (घ) वितरति | |
| **x.** | **भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)**<br>44. "वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्" अस्मिन् वाक्ये विशेष्यपदं किम्?<br>(क) जलम् (ख) भृशं (ग) दूषितं (घ) निर्मलं<br>45. "इत्युक्ता धाविता तूर्णं व्याघ्रमारी भयङ्करा" अत्र 'तूर्णं' पदस्य विलोमपदं किम्?<br>(क) हिंसकम् (ख) भयङ्करम् (ग) मन्दम् (घ) शीघ्रम्<br>46. "तत्र राजसिंहः नाम राजपुत्रः वसति स्म" अत्र क्रियापदं किम्?<br>(क) तत्र (ख) नाम (ग) वसति (घ) राजपुत्रः<br>47. "सः कृच्छ्रेण भारमुद्वहति।" अत्र 'सरलतया' इत्यस्य किं विलोमपदं प्रयुक्तम्?<br>(क) सः (ख) कृच्छ्रेण (ग) उद्वहति (घ) भारम्<br>48. "(परिष्वज्य) अहो हृदयग्राही स्पर्शः" अस्मिन् वाक्ये 'परिष्वज्य' इत्यस्य पर्यायपदं किम्?<br>(क) त्यज्य (ख) आगत्य (ग) आलिङ्ग्य (घ) संस्पर्श्य<br>49. "व्याघ्रो भयाकुलचित्तो नष्टः" अत्र कर्तृपदं किम्?<br>(क) चित्तो (ख) भयाकुलः (ग) व्याघ्रो (घ) नष्टः<br>50. "सम्प्रति युज्यते। किं नामधेयम्?" अत्र अव्ययपदं किम्?<br>(क) युज्यते (ख) सम्प्रति (ग) किम् (घ) नामधेयम्<br>51. "महानगरमध्ये चलत् अनिशं कालायसचक्रम्" अत्र 'अहर्निशम्' इत्यर्थे किं पदं दत्तम्?<br>(क) चलत् (ख) चक्रम् (ग) कालायस (घ) अनिशम् | 1x6-6 |